श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीदेशिकमङ्गळम् ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

* This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ श्रीदेशिकमङ्गळम् ॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमाल्लक्ष्मण योगीन्द्र सिद्धान्त विजयध्वजम्।
विश्वामित्र कुलोद्भूतं वरदार्यमहं भजे॥

सर्वतन्त्र स्वतन्त्राय सिंहाय कविवादिनाम्।
वेदान्ताचार्य वर्याय वेङ्कटेशाय मङ्गळम्॥ १ ॥

नभस्यमासि श्रोणायाम् अवतीर्णाय सूरये।
विश्वामित्रान्वयायास्तु वेङ्कटेशाय मङ्गळम्॥ २ ॥

पिता यस्यानन्तसूरिः पुण्डरीकाक्ष यज्वनः।
पौत्रो यस्तनयस्तोतारम्बायास्तस्य मङ्गळम्॥ ३ ॥

वेङ्कटेशावतारोऽयं तद्घण्टांशोऽथवा भवेत्।
यतीन्द्रांशोऽथवेत्येवं वितर्क्यायास्तु मङ्गळम्॥ ४ ॥

श्रीभाष्यकारः पन्थानम् आत्मना दर्शितं पुनः।
उद्धर्तुमागतो नूनम् इत्युक्तायास्तु मङ्गळम्॥ ५ ॥

यो बाल्ये वरदार्यस्य प्राचार्यस्य परां दयाम्।
अवाप्य वृद्धिं गमितः तस्मै योग्याय मङ्गळम्॥ ६ ॥

रामानुजार्यादात्रेयात् मातुलात् सकलाः कलाः।
अवाप विंशत्यब्दे यः तस्मै प्राज्ञाय मङ्गळम्॥ ७ ॥

श्रुतप्रकाशिका भूमौ येनादौ परिरक्षिता।
प्रवर्तिता च पात्रेषु तस्मै श्रेष्ठाय मङ्गळम्॥ ८ ॥

सांस्कृतीभिर्द्रामिडीभिः बह्वीभिः कृतिभिर्जनान्।
यस्समुज्जीवयामास तस्मै सेव्याय मङ्गळम्॥ ९ ॥

यः ख्याति लाभ पूजासु विमुखो वैष्णवे जने।
क्रयणीय दशां प्राप्तः तस्मै भव्याय मङ्गळम्॥ १० ॥

यस्मादेव मया सर्वं शास्त्रमग्राहि नान्यतः।
तस्मै वेङ्कटनाथाय मम नाथाय मङ्गळम्॥ ११ ॥

पित्रे ब्रह्मोपदेष्ट्रे मे गुरवे दैवताय च।
प्राप्याय प्रापकायास्तु वेङ्कटेशाय मङ्गळम्॥ १२ ॥

यः कृतं वरदार्येण वेदान्ताचार्य मङ्गळम्।
आशास्तेऽनुदिनं सोऽपि भवेन् मङ्गळ भाजनम्॥ १३ ॥

## सप्तति रत्न मालिका

भाद्रपदमासगत विष्णुविमलर्क्षे
वेङ्कटमहीध्रपति तीर्थदिनभूते।
प्रादुरभवज्जगति दैत्य रिपुघण्टा
हन्त कवितार्किक मृगेन्द्र गुरुमूर्त्या॥

सशङ्खचक्रलान्छनः सदूर्ध्वपुण्ड्रमण्डितः
सकण्ठलग्नसत्तुलस्यनर्घ पद्ममालिकः।
सितान्तरीय सूत्तरीय यज्ञसूत्र शोभितः
ममाविरस्तु मानसे गुरुः स वेङ्कटेश्वरः॥

अनन्त सूरि सूनवेऽभिनन्द्यमान वैभवाद्
दिगन्त वादिहंस जैत्रकालमेघ देशिकात्।
उपात्त सर्वशासनाय हन्त वर्ष विंशतौ
पुनःपुनर्नमस्क्रियाऽस्तु वेङ्कटेश सूरये॥

कवितार्किक कलभव्रज कबलीकृतिसिंहं
कमलापति करुणारस परिवर्धित बोधम्।
यतिनायक पदपङ्कज युगली परतन्त्रं
भज मानस बुधवेङ्कटपतिदेशिकमनिशम्॥

कलये सततं करुणा जलधिं
करुणा विषयं कमलाधिपतेः।
कलि वैरि शठारि वचो रसिकं
कवितार्किक केसरि सूरि गुरुम्॥

गुरौ वादिहंसाम्बुदाचार्यशिष्ये
जना भक्तिहीना यतीन्द्राप्रियाः स्युः।
यतीन्द्राप्रिया विष्णु कारुण्यदूराः
कुतो मुक्तिवार्ता हि तादृग्विधानाम्॥

वेदे सञ्जात खेदे मुनिजन वचने प्राप्तनित्यावमाने
संकीर्णे सर्ववर्णे सति तदनुगुणे निष्प्रमाणे पुराणे।
मायावादे समोदे कलिकलुष वशाच्छून्यवादेऽविवादे
धर्मत्राणाय योऽभूत् स जयति भगवान् विष्णु घण्टावतारः॥

॥ इति श्रीदेशिकमङ्गळम् समाप्तम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥